"भानुर्लम्बाककुद्यामिर्विश्वा साध्या मरुत्वती।
वसुर्मुहूर्त्ता संकल्पा धर्म्मपत्न्यः सुतान् शृणु॥")

मरुत्सखः, पुं, (मरुतां देवानां सखा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) इन्द्रः। इति धरणिः॥ (मरुतो वायोः सखा।) अग्निः। वायुसख इत्यमरदर्शनात्॥ (वायुसखे, त्रि। यथा, रघौ। ११। ३।

"तावदाशु विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः॥")

मरुदान्दोलः, पुं, (मरुत् वायुरान्दोल्यतेऽनेनेति। आन्दोलि+करणे घञ्।) धवित्रम्। इति शब्दमाला॥

मरुदिष्टः, पुं, (मरुतां देवानामिष्टः प्रियः।) गुग्गुलुः। इति राजनिर्घण्टः॥ (विशेषोऽस्य गुग्गुलुशब्दे ज्ञातव्यः॥)

मरुद्ध्वजं, क्ली, (मरुतस्तु वायुस्तु ध्वजः पताकेव। नभसि वायुवशाच्चलितत्वादस्य तथात्वम्।) वाततूलम्। बुड़ीर सुता इति भाषा। यथा,—
"ग्रीष्महासं वंशकफं वाततूलं मरुद्ध्वजम्॥"
इति हारावली। २३॥

मरुद्भवा, स्त्री, (मरुद्वायुर्भव उत्पत्तिकारणं यस्याः।) ताम्रमूलाक्षुपः। इति रत्नमाला। खिराइ इति भाषा॥

मरुद्रथः, पुं, (मरुद्वायू रथो यानमिवास्य। ऊर्द्ध्वलोकं वियति बहुतरं गच्छतीति तथात्वम्।) अश्वः। इति त्रिकाण्डशेषः॥ देवरथः। इति हेमचन्द्रः। ३। ४२६॥

मरुद्रुमः, पुं, (मरोर्निर्ज्जलदेशस्य द्रुमः। मरुजातो द्रुमो वा।) विट्खदिरः। इति रत्नमाला॥

मरुद्वर्त्म, क्ली, (मरुतां वायूनां देवानां वा वर्त्म पन्थाः।) आकाशम्। इति त्रिकाण्डशेषः॥

मरुद्वाहः, पुं, (मरुता वायुना उह्यतेऽसौ इति। वह+कर्म्मणि घञ्। यद्वा, मरुद्वायुर्वाह इव यस्य।) धूमः। इति त्रिकाण्डशेषः॥ अग्निः। इति शब्दमाला॥

मरुद्विपः, पुं, (मरौ निर्ज्जलदेशे द्विपो हस्तीव।) उष्ट्रः। इति त्रिकाण्डशेषः॥

मरुन्माला, स्त्री, (मरुद्भिर्मल्यते धार्य्यते इति। मल धारणे+कर्म्मणि घञ्। टाप्।) स्पृक्का। इत्यमरः। २। ४। १२३॥ पिड़िंशाक इति भाषा॥ (पर्य्यायोऽस्य यथा,—
"स्पृक्कासृक् ब्राह्मणी देवी मरुन्माला लता लघुः।
समुद्रान्ता वधूः कोटिवर्षा लङ्कापिकेत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मरुप्रियः, पुं, (मरुर्निर्ज्जलदेशः प्रियोऽस्य।) उष्ट्रः। इति हेमचन्द्रः। ४। ३१९॥

मरुभूः, स्त्री, (मरुर्निर्ज्जला भूर्भूमिः।) दाशेरकदेशः। इति त्रिकाण्डशेषः॥ मारवोयार इति भाषा॥ निर्ज्जलभूमिश्च॥

मरुभूरुहः, पुं, (मरुभुवि रोहति जायते इति। रुह+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) करीरवृक्षः। इति भावप्रकाशः॥ मरुभूमिजाते, त्रि॥ (यथा, आर्य्यासप्तशत्याम्। ६७६।
"सत्पुंसो मरुभूरुह इव जीवनमात्रमाशास्यम्॥")

मरुलः, पुं, (म्रियते जलं विनेति। मृ+उलः।) कारण्डवपक्षी। इति हेमचन्द्रः। ४। ४०७॥

मरुवः, पुं, (मरुं निर्ज्जलदेशं वाति प्राप्नोतीति। वा+कः।) वृक्षविशेषः। मरुया इति नागदाना इति च भाषा॥ तत्पर्य्यायः। खरपत्रः २ गन्धपत्रः ३ फणिज्झकः ४ बहुवीर्य्यः ५ शीतलकः ६ सुराह्वः ७ समीरणः ८ जम्बीरः ९ प्रस्थकुसुमः १० मरुवकः ११ घ्राणक्षसुरभिपत्रः १२ मरिचः १३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कृमिकुष्ठविड्बन्धाध्मानशूलमान्द्यत्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मरुत्तको मरुवको मरुन्मरुरपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥
मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः।
वृश्चिकादिविषश्लेष्मवातकुष्ठकृमिप्रणुत्।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः॥"
इति भावप्रकाशः॥

मरुवकः, पुं, (मरुव+स्वार्थे इवार्थे वा कन्।) कण्टकिवृक्षविशेषः। मयना इति भाषा। तत्पर्य्यायः। पिण्डीतकः २ श्वसनः ३ करहाटकः ४ शल्यः ५ मदनः ६। (पर्य्यायान्तरं यथा,—
"मदनश्छर्द्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥")
खरपत्रतुलसी। तत्पर्य्यायः। समीरणः २ प्रस्थपुष्पः ३ फणिज्झकः ४ जम्बीरः ५। इत्यमरः। २। ४। ७९॥ (एतत्पर्य्यायो यथा,—
"मरुत्तको मरुवको मरुन्मरुरपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
जम्बीरभेदः। इत्यमरटीकायां भरतः॥ पुष्पवृक्षविशेषः। मरुयाफुल इति भाषा। तत्पर्य्यायः। शुक्लपुष्पः २ तिलकः ३ कुलकः ४। क्षुपविशेषः। नागदाना इति भाषा। तत्पर्य्यायः। खरपत्रः २ गन्धपत्रः ३। इति रत्नमाला॥ व्याघ्रः। राहुः। भयानके, त्रि। इति जटाधरः॥

मरुसम्भवं, क्ली, (मरुः सम्भव उत्पत्तिस्थानमस्य।) चाणक्यमूलकम्। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—
"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
शालमर्कटकं विस्रं शालेयं मरुसम्भवम्॥
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका।
नेपालमूलकञ्चान्यत् तद्भवेद्गजदन्तवत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मरुसम्भवा, स्त्री, (मरौ सम्भवो यस्याः। टाप्।) महेन्द्रवारुणी। क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

मरुस्था, स्त्री, (मरौ तिष्ठतीति। स्था+कः। स्त्रियां टाप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

मरूकः, पुं, (म्रियते इवेति। मृ+"मृकणिभ्यामूकोकणौ।" उणा० ४। ३९। इति ऊकः। भयशीलत्वादस्य तथात्वम्।) मृगविशेषः। इत्युणादिकोषः॥ मयूरः। शटी। इति संक्षिप्तसारोणादिवृत्तिः॥

मरूद्भवा, स्त्री, (मरौ धन्वप्रदेशे उद्भवतीति। उत्+भू+अच्। स्त्रियां टाप्।) कार्पासी। यवासः। क्षुद्रखदिरः। इति राजनिर्घण्टः॥

मरोलिः, पुं, (मरौ निर्ज्जलदेशे लीयते म्रियते इति। मरु+ली+इन्। पृषोदरादित्वात् साधुः।) मकरः। यथा,—
"जलरूपस्तु मकरो मरोलिरसिदंष्ट्रकः॥"
इति त्रिकाण्डशेषः॥

मरोलिकः, पुं, (मरोलि+स्वार्थे कन्।) मकरः। इति शब्दरत्नावली॥

मर्क, सर्पे। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मर्कटः। इति दुर्गादासः॥

मर्कः, पुं, (मर्च्चति चेष्टते इति। मर्च्च+"इण्भीकापाशल्यतिमर्च्चिभ्यः कन्।" उणा० ३। ४३। इति कन्। यद्वा, मर्कति सर्पतीति। मर्क+अच्।) देहः। वायुः। इत्युणादिकोषः॥ (शुक्रपुत्त्रः। यथा, वाजसनेयसंहितायाम्। ७। १६।
"उपयामगृहीतोऽसि मर्काय त्वा।"
"मर्कः शुक्रपुत्त्रोऽसुरपुरोहितः।" इति तद्भाष्ये महीधरः॥) वानरः। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। १०। ८। २९।
"मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भाण्डं भिनत्ति॥"
"मर्कान् मर्कटान्।" इति तट्टीकायां श्रीधरस्वामी॥ त्रि, मार्ज्जयिता। यथा, ऋग्वेदे। १०। २७। २०।
"सूरश्च मर्क उपरो बभूवान्॥"
"मर्को मार्ज्जयिता।" इति तद्भाष्ये सायनः॥)

मर्ककः, पुं, (मर्क+इवार्थे संज्ञायां वा कन्।) गलमण्डपक्षी। इति शब्दरत्नावली॥ हाड़गिल् इति भाषा॥

मर्कटः, पुं, (मर्कति गच्छतीति। मर्क+"शकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) वानरः। इत्यमरः। २। ५। ३॥ (यथा, वाजसनेयसंहितायाम्। २४। ३०।
"यमाय कृष्णो मनुष्यराजाय मर्कटः॥")
ऊर्णनाभः। (यथा आर्य्यासप्तशत्याम्। ३२२।
"अयमुदयगृहीतवड़िशः कर्कट इव मर्कटः पुरतः॥"